श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४२

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४२

*शकटासुरवधवर्णनम्*

कदापि जन्मर्क्षदिने तव प्रभो निमन्त्रितज्ञातिवधूमहीसुरा।
महानसस्त्वां सविधे निधाय सा महानसादौ ववृते व्रजेश्वरी॥ १ ॥

ततो भवत्त्राणनियुक्तबालकप्रभीतिसङ्क्रन्दनसङ्कुलारवैः।
विमिश्रमश्रावि भवत्समीपतः परिस्फुटद्दारुचटच्चटारवः॥ २ ॥

ततस्तदाकर्णनसम्भ्रमश्रमप्रकम्पिवक्षोजभरा व्रजाङ्गनाः।
भवन्तमन्तर्ददृशुस्समन्ततो विनिष्पतद्दारुणदारुमध्यगम्॥ ३ ॥

शिशोरहो किं किमभूदिति द्रुतं प्रधाव्य नन्दः पशुपाश्च भूसुराः।
भवन्तमालोक्य यशोदया धृतं समाश्वसन्नश्रुजलार्द्रलोचनाः॥ ४ ॥

कस्को नु कौतस्कुत एष विस्मयो विशङ्कटं यच्छकटं विपाटितम्।
न कारणं किञ्चिदिहेति ते स्थिताः स्वनासिकादत्तकरास्त्वदीक्षकाः॥ ५ ॥

कुमारकस्यास्य पयोधरार्थिनः प्ररोदने लोलपदाम्बुजाहतम्।
मया मया दृष्टमनो विपर्यगादितीश ते पालकबालका जगुः॥ ६ ॥

भिया तदा किञ्चिदजानतामिदं कुमारकाणामतिदुर्घटं वचः।
भवत्प्रभावविदुरैरितीरितं मनागिवाशङ्क्यत दृष्टपूतनैः॥ ७ ॥

प्रवाळताम्रं किमिदं पदं क्षतं सरोजरम्यौ नु करौ विरोजितौ।
इति प्रसर्पत्करुणातरङ्गितास्त्वदङ्गमापस्पृशुरङ्गनाजनाः॥ ८ ॥

अये सुतं देहि जगत्पतेः कृपातरङ्गपातात्परिपातमद्य मे।
इति स्म सङ्गृह्य पिता त्वदङ्गकं मुहुर्मुहुः श्लिष्यति जातकण्टकः॥ ९ ॥

अनोनिलीनः किल हन्तुमागतः सुरारिरेवं भवता विहिंसितः।
रजोऽपि नो दृष्टममुष्य तत्कथं स शुद्धसत्त्वे त्वयि लीनवान् ध्रुवम्॥ १० ॥

प्रपूजितैस्तत्र ततो द्विजातिभिर्विशेषतो लम्भितमङ्गलाशिषः।
व्रजं निजैर्बाल्यरसैर्विमोहयन् मरुत्पुराधीश रुजां जहीहि मे॥ ११ ॥

**********